## इदुदुपधस्य चाप्रत्ययस्य । (४१/१६५)

[1]इकारोपधस्य उकारोपधस्य च अप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः । निर्दुर्बहिराविश्चतुर्प्रादुस् । [2]निस् – निष्कृतम् । निष्पीतम् । दुस् – दुष्कृतम् । दुष्पीतम् । बहिस् – बहिष्कृतम् । बहिष्पीतम् । आविस् – आविष्कृतम् । आविष्पीतम् । चतुर् – चतुष्कृतम् । चतुष्कपालम् । चतुष्कलम् । [3]चतुष्कण्टकम्[4] । प्रादुस् – प्रादुष्कृतम् । प्रादुष्पीतम् । अप्रत्ययस्य इति किम् ? अग्निः करोति । वायुः[5] करोति । मातुः करोति, पितुः करोति, अत्र 'रात् सस्य' (८.२.२४/२८०) इति सकारलोपे कृते रेफस्य यो विसर्जनीयः, तस्य[6] अप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति ? कस्कादिषु (८,३.४८/१४४) तु भ्रातुष्पुत्रग्रहणं ज्ञापकमे[7]कादेशनिमित्तत्वात् षत्वप्रतिषेधस्य ।

[९४२] पुम्मुहुसोः प्रतिषेधो वक्तव्यः । (म.भा.३.४३४)

पुंस्कामा । मुहु≍कामा । [8]नैष्कुल्यम् । दौष्कुल्यम् । दौष्पुरुष्यम् । नि३ष्कुलम् । [9]दु३ष्कुलम् । दु३ष्पुरुषः[10] । बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् षत्वं [11]प्रवर्तते ॥

## तिरसोऽन्यतरस्याम् । (४२/१६६)

तिरसः विसर्जनीयस्य अन्यतरस्यां सकारादेशो भवति कुप्वोः परतः । तिरस्कर्ता । तिरस्कर्तुम् । तिरस्कर्तव्यम् । तिरःकर्ता । तिरः कर्तुम् । तिरः कर्तव्यम् । [12]गतेरित्येव, [13]तिरः कृत्वा काण्डं गतः ॥

## द्विस्त्रिश्चतुरिति कृत्वोऽर्थे । (४३/१६७)

[14]षः इति सम्बध्यते । द्विस् त्रिस् चतुर् इत्येतेषां कृत्वोऽर्थे वर्तमानानां विसर्जनीयस्य षकार आदेशो भवति अन्यतरस्यां कुप्वोः परतः । द्विष्करोति, द्विः करोति । त्रिष्करोति, त्रिः करोति । चतुष्करोति, चतुः करोति । द्विष्पचति, द्विः पचति । त्रिष्पचति, त्रिः पचति । चतुष्पचति, चतुः पचति । कृत्वोऽर्थे इति किम् ? चतुष्कपालम् । [15]चतुष्कण्टकम् । पूर्वेण नित्यं षत्वं भवति । इदुदुपधस्य (८.३.४१/१५५) इत्येतस्य अनुवृत्तौ सत्यां कृत्वोऽर्थविषयेण[16] च पदेन विसर्जनीये विशेष्यमाणे द्विस्त्रिश्चतुरिति शक्यमकर्तुम् ।

कृत्वसुजर्थे षत्वं ब्रवीति[17] कस्माच्चतुष्कपाले [18]मा ।
षत्वं विभाषया [19]भून्ननु सिद्धं तत्र पूर्वेण ॥

सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे ।
लुप्ते कृत्वोर्थीये रेफस्य विसर्जनीयो हि ॥

---

1. इकारोकारोपधस्य अप्रत्ययादिविसर्जनीयस्य इ. 2. निर् इ. 3. चतुष्कन्दलम् इ. 4. चतुष्पीतम् इत्यधिकम् ड. 5. पिबति इ. ह. 6. विसर्जनीयस्य इत्यधिकम् ह. 7. एकदेश° इ. 8. वृद्धिभूतानां षत्वम् इत्यधिकम् इ. 9. दु३ष्कुरु इ. 10. इत्यत्र इत्यधिकम् ब. क. इ. ड. 11. प्रवृत्तम् क. 12. गत्योरित्येव ह, गतिरित्येव इ. 13. तिरस्कृत्वा इ. 14. वाक्यमिदं नास्ति इ. ड. 15. चतुष्कण्टकः इ. 16 चतुःपदेन क. 17. इति इत्यधिकम् इ. 18. न क. 19. भूते क.